## ॥ घोष शान्तिः ॥

शन्नो वातः पवतां मातरिश्वा शन्नस्तपतु सूर्यः । अहानि शं भवन्तु नश्शंरात्रिः प्रति धीयताम् । शमुषा नो व्युच्छतु शमादित्य उदेतु नः । शिवा नश्शन्तमा भव सुमृडीका सरस्वति । मा ते व्योम सन्दृशि । इडायै वास्त्वसि वास्तुमद्वास्तुमन्तो भूयास्म मा वास्तोश्छित्थ्स्मह्य वास्तुस्सभूयाद्योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः । प्रतिष्ठाऽसि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायाश्छित्थ्स्मह्यप्रतिष्ठस्स भूयाद्योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः । आवात वाहि भेषजँव्विवातवाहि यद्रपः । त्वँ हि विश्व भेषजो देवानान्दूत ईयसे । द्वाविमौ वातौ वात आसिन्धोरापरावतः । (1) दक्षं मे अन्य आवातु पराऽन्येवातु यद्रपः । यदो वाततेगृहेऽमृतस्य

निधिर्हितः । ततो नो देहिजीवसेततो नो धेहि भेषजम् । शंभूर्मयोभूर्नोह्रदे प्रण आयू षि तारिषत् । इन्द्रस्य गृहोऽसि तन्त्वाप्रपद्ये सगुस्साश्वः । सह यन्मेअस्ति तेन । भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवस्सुवः प्रपद्ये वायुं प्रपद्येऽनार्तान्देवतां प्रपद्येऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्म कोशं ब्रह्म प्रपद्य ओं प्रपद्ये । अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च ययावातस्स्वस्त्या स्वस्तिमान्तया स्वस्त्या स्वस्ति मानसानि । प्राणापानौ मृत्योर्मा पातं प्राणापानौ मामाहासिष्टं मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु । (2) द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः। तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उतद्यौः । कयानश्चित्र आभुवदूती सदावृधस्सखा । कया शचिष्ठया वृता । कस्त्वा सत्योमदानां मंहिष्ठो मथ्सदन्धसः। दृढाचिदारुजे वसु । अभीषुणस्सखीनामविता जरितृणाम् । शतं भवास्यूतिभिः। वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् । (3)शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः। ईशाना वार्याणां क्षयन्ती श्चर्षणीनाम् । अपो याचामि भेषजम्। सुमित्रान आप ओषधयस्सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यञ्चवयं द्विष्मः । आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे ।

योवश्शिवतमोरसस्तस्य भाजयतेहनः । उशतीरिव मातरः । तस्मा अरङ्गमामवो यस्यक्षयाय जिन्वथा (4) आपो जनयथाचनः । पृथिवी शान्ता साऽग्निना शान्ता सा मे शान्ता शुच शमयतु । अन्तरिक्षँशान्तं तद्वायुना शान्तन्तन्मे शान्तँ शुच शमयतु । द्यौश्शान्ता साऽदित्येन शान्ता सा मे शान्ता शुच शमयतु। पृथिवी शान्तिरन्तरिक्ष शान्ति द्यौश्शान्ति दिशश्शन्तिरवान्तर दिशाश्शन्ति रग्निश शान्ति र्वायुश शान्ति रादित्यश शान्तिश्चन्द्रमाश शान्ति र्नक्षत्राणि शान्ति रापश्शान्तिरोष धयश्शान्तिर्वनस्पतयश्शान्ति र्गौश्शान्तिरजा शान्तिरश्वश्शान्तिः पुरुषश्शान्ति ब्रह्मशान्ति ब्राह्मणश्शान्तिश शान्तिरेव शान्तिश्शान्तिर्मे अस्तु शान्तिः । तयाहं शान्त्या सर्व शान्त्या मह्यन्द्विपदे चतुष्पदेच शान्तिङ्करोमि शान्तिर्मे अस्तु शान्तिः एहश्रीश्चह्रीश्चधृतिश्च तपोमेधा प्रतिष्ठा श्रद्धा सत्यन्धर्मश्चैतानि मोत्तिष्ठन्तमनूत्तिष्ठन्तु म्मामाँ श्रीश्चह्रीश्च धृतिश्चतपोमेधा प्रतिष्ठा श्रद्धा सत्यं धर्म श्चैतानि मामाहासिषुः उदायुषास्वायुषो दोषधीना रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताँ अनु । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदश्शतञ्जीवेम शरदश्शतन्नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतँ श्रृणवाम शरदश्शतं प्रब्रवाम शरदश्शतमजीताश्याम शरदश्शतं ज्योक्च सूर्यन्दृशे।(5) य उदगान्महतोऽर्णवाद्विभ्राजमानस्सरिरस्य मध्याथ्समा वृषभो लोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु । ब्रह्मण श्चोतन्यसि ब्रह्मण आणीस्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन, महदन्तरिक्षं दिवन्दाधार पृथिवीँ सदेवाँयदहँव्वेद तदहन्धारयाणि मामद्वेदोऽधिविस्रसत् । मेधामनीषे माविशताँ समीचीभूतस्य भव्यस्यावरुध्यै सर्वमायुरयाणि सर्वमायुरयाणि । आभिर्गीर्भिर्यदतोन ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठ भाजो अध ते स्याम । ब्रह्म प्रावादिष्म तन्नो माहासीत् ।

ओं शान्तिश्शान्तिश्शान्तिः ।। ।।(6)

हरिः ओ(3)म्